योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १००

शततमः सर्गः १००

शिखिध्वज उवाच ।

एवं चेत्तन्महाबुद्धे यादृशं कारणं परम् ।

कार्यं तादृशमेवेदं जगदित्येव वेद्म्यहम् ।। १

कुम्भ उवाच ।

यत्र कारणता तस्य कार्यं तदुपपद्यते ।

यन्न कारणमेवादौ तस्मात्कार्यं कुतो भवेत् ।। २

नेहास्ति कारणं किंचिन्न च कार्यं कदाचन ।

विद्यमानमिदं सर्वं सर्वं शान्तमजं जगत् ।। ३

जायते कारणात्कार्यं यत्तत्कारणवद्भवेत् ।

यन्न जायत एवेह तस्मिन्सदृशता कुतः ।। ४

बीजमेव न यस्यास्ति तत्कथं वद जायते ।

अप्रतर्क्यमनाख्यं च यत्तस्य क्वेव बीजता ।। ५

देशकालवशात्सर्वे हेतुमन्तः प्रमाणगाः ।

अकर्तृब्रह्मविषयः प्रमा कारणयोः कथम् ।। ६

अकर्तृकर्मकरणे नास्ति कारणता शिवे ।

तस्मात्तत्कारणं नास्ति जगच्छब्दार्थवेदनम् ।। ७

ब्रह्मैव त्वं स्वरूपं सद्यत्स्थितं धारयस्व तत् ।

असम्यग्दर्शिविषयं तदेव जगदाचितम् ।। ८

चिन्मात्रमजरं शान्तं यदेकं तत्प्रमीयते ।

तेनैवायं जगद्ब्रह्म सच्छान्तं बुद्ध्यते वपुः ।। ९

अन्यथैव च यो भावश्चेतसः पृथिवीपते ।

स एव नाशः कथितः स्वानुभूतश्च पण्डितैः ।। १०

चित्तं नाशस्वभावं तद्विद्धि नाशात्मकं नृप ।

क्षणनाशो यतः कल्पचित्तशब्देन कथ्यते ।। ११

असंकल्पनमात्रेण सम्यग्ज्ञानोदयात्मना ।

संकल्पः क्षीयते सिद्धौ स्वयमेवासदात्मकः ।। १२

नाम्नैवाङ्गीकृताभावं यदि विश्वं हि कथ्यते ।

विद्यमानं कथं तत्स्यान्ननु तामरसेक्षण ।। १३

हस्तावुत्क्षिप्य यो ब्रूते शद्रोऽस्मीति भृशं गिरा ।

कथं स विप्रो भवति विप्रत्वं त्वस्य कीदृशम् ।। १४

विवृत्तधातुरत्युच्चैर्मृतोऽस्मीति विरौति यः ।

मृतिमेवागतं विद्धि जीवनं तस्य संभ्रम ।। १५

भ्रमाकृति यदस्तीह दृश्यतेऽलातचक्रवत् ।

मृगतृष्णाद्विचन्द्रादिबालवेतालकादिवत् ।। १६

तत्कथं किल नाम स्यात्सत्यं श्रमभरात्मकम् ।

अज्ञानभ्रान्तिरेवान्तश्चित्तमित्येव कथ्यते ।। १७

अज्ञानमुच्यते चित्तमसत्सदिव संस्थितम् ।

असंवेदनमज्ञानं ज्ञानं संवेदनं भवेत् ।। १८

अज्ञानसत्त्वसंवित्तेर्ज्ञानात्संवेदनात्क्षयः ।

जलज्ञानं मुधा भ्रान्तिः साधो मरुमरीचिषु ।। १९

नैतज्जलमिति ज्ञानात्संवित्तेः प्रविलीयते ।

इदं चित्तमिति प्रौढं यदज्ञानमलं हृदि ।। २०

नास्ति चित्तमिति ज्ञानात्तत्समूलं विनश्यति ।

यथा रज्ज्वां भुजङ्गत्वमज्ञानभ्रमसंभवम् ।। २१

न सर्पोऽयमिति ज्ञानाद्धृदि रूढात्प्रणश्यति ।

तथात्मनि मनोभूतमज्ञानभ्रमसंभवम् ।। २२

चित्तं नास्तीति विज्ञानाद्धृदि रूढाद्विनश्यति ।

चित्तं मनोऽहमित्यन्तर्यावदज्ञानसंभवम् ।। २३

न चित्तमस्ति नो चैवमहंकारादिसंयुतम् ।

किंचिदेव जगत्यस्मिन्संविदेकान्तनिर्मला ।। २४

तया संकल्पचित्तादि कृतमासीद्विमूढया ।

अद्यासंकल्पतः सर्वं परित्यक्तं प्रबुद्धया ।। २५

संकल्पेन यदा याति त्वसंकल्पेन गच्छति ।

पवनेन महाबाहो ज्वालाजालमिवानले ।। २६

आत्मतत्त्वैकघनया ततया ब्रह्मसत्तया ।

जगत्सर्वमिति व्याप्तं समुद्र इव वारिणा ।। २७

नाहमस्मि न चान्योस्ति न त्वं नैते न चित्तकम् ।

नेन्द्रियाणि न चाकाशमात्मा त्वेकोऽस्ति निर्मलः ।। २८

घटाद्याकाररूपेण स एवायं विलोक्यते ।

इदं चित्तमयं चाहमिति कैव कुकल्पना ।। २९

न जायते न म्रियते किंचिदस्मिञ्जगत्त्रये ।

केवलोऽयं चिदुल्लासः सदसद्भावनात्मना ।। ३०

सर्वमात्मा परंब्रह्म सकृत्प्रकटमाततम् ।

द्वित्वैकत्वे न विद्येते न भ्रान्तिर्न च संभ्रमः ।। ३१

सर्वेन्द्रियगणाकारे सन्नेवासि सखे ततः ।

न दह्यसे महाबुद्धे न च क्वचन लिप्यसे ।। ३२

न ते विनश्यति सखे न च किंचिद्विवर्धते ।

निर्मलाकाशरूपस्य कैवल्यानन्तरूपिणः ।। ३३

इच्छानिच्छात्मिके शक्ती येतरापि त्वमेव च ।

न ह्यंशुव्यतिरेकेण शशाङ्क उपलभ्यते ।। ३४

अजमजरमनाद्यजस्वभावं

सकृदमलं विलसत्सदैकरूपम् ।

विगलितकलनं कलाख्यलीलं

सदुदितमाद्यमजं तदात्मतत्त्वम् ।। ३५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मोक्षो० निर्वाणप्रकरणे पू० चू० शिखिध्वजपरमावबोधनं नाम शततमः सर्गः ।। १०० ।।